**शिखिवाहन** पु० शिखी मयूरो वाहनं यस्य । कार्त्तिकेये अमरः ।

**शिखिव्रत** न० "प्रतिपद्येकभक्ताशी समान्ते कपिलाप्रदः । वैश्वानरपदं याति शिखिव्रतमिदं स्मृतम्" गरुपु० १२९ अ० उक्ते वह्निपददायके व्रतभेदे ।

**शिग्रु** पु० शि–रक् गुक् च । (सजिना) १वृक्षे २शाकमात्रे च अमरः । "शोभाञ्जनो नीलशिग्रुस्तीक्ष्णगन्धो जनप्रियः । सुखमोदः कृष्णशिग्रुस्तुल्यो रुचिराञ्जनः । शोभाञ्जनस्तीक्ष्णकटुः स्वादूष्णः पिच्छिलस्तथा । जन्तुवातार्त्तिशूलघ्नस्तुल्यो रोचनः परः । श्वेतशिग्रुः सुतीक्ष्णः स्यान्मुखभङ्गः सिताह्वयः । समूलः श्वेतमरिचो रोचनो मधुशिग्रुकः । श्वेतशिग्रुः कटुस्तीक्ष्णः शोफानिलनिकृन्तनः । अङ्गव्यथाहरो रुच्यो दीपनो मुखजाड्यनुत् । रक्तको रक्तशिग्रुः स्यान्मधुरो बहुलच्छदः । सुगन्धिः केशरी सिंहो मृगारिश्च प्रकीर्त्तितः । रक्तशिग्रुर्महावीर्य्यो मधुरश्च रसायनः । शोफाध्मानसमीरार्त्तिपित्तश्लेष्मापहारकः" राजनि० ।

**शिग्रुज** न० शिग्रुतो जायते जन ड । श्वेतमरिचे शोभाञ्जनबीजे अमरः ६त० । शिग्रुबीजमप्यत्र शब्दच० ।

**शिघ** आघ्राणे भ्वा० पर० सक० सेट् इदित् । शिङ्घति अशिङ्घीत् ।

**शिङ्घाण** न० शिघि–आनच् पृषो० णत्वम् । १काचपात्रे २लाहमले ३नासिकामले श्लेष्मणि च मेदि० । स्वार्थे क । नासिकामले न० ।

**शिज** अव्यक्तध्वनौ इदित् वा चु० उभ० पक्षे अदा० आत्म० अक०सेट् । शिञ्जयति ते शिङ्क्ते अशिशिञ्जत् त अशिञ्जिष्ट । भ्वादिरप्ययं पर० इत्येके तेन शिञ्जति अशिञ्जीत्

**शिञ्जा** स्त्री शिजि–भावे अ । १भूषणशब्दे शब्दर० । शिजिअच । २धनुर्गुणे हेमच० ।

**शिञ्जित** न० शिजि–भावे क्त । भूषणध्वनौ अमरः ।

**शिञ्जिनी** स्त्री शिञ्जति शिजि–णिनि । धनुर्गुणे अमरः । २नूपुरे हेमच० ।

**शिट** अनादरे भ्वा०पर०सक० सेट् । शेटति अशेटीत् ।

**शिखण्डाकी** स्त्री खाद्यद्रव्यभेदे यथा "शिखण्डाकी राजिकायुक्तैः स्यान्मूलकदलद्रवैः । सर्षपस्वरसैर्वापि शालिपिष्टकसंयुतैः । शिखण्डाकी रोचनी गुर्वी पित्तश्लेष्मकरी स्मृता" राजनि० ।

**शित** त्रि० शो–क्त । १दुर्बले २शाणिते च मेदि० ३कृशे विश्वः

**शितद्रु** पु० शतं द्रवति द्रु–कु–नि० । (शतलुज) नदीभेदे अमरः । [२गोधूमे त्रिका० ।

**शितशूक** पु० शितस्तीक्ष्णः शूकोऽग्रं यस्य । १यवे अमरः ।

**शिति** पु० शि–क्तिच् । १भुर्जपत्त्रवृक्षे २शुक्लवर्णे ३कृष्णवर्णे च मेदि० ४तद्वर्णवति त्रि० । ५सारे पुंस्त्री० शब्दर० ।

**शितिकण्ठ** पु० शितिः नीलः कण्ठो यस्य । १शिवे अमरः । २दात्यूहविहगे पुंस्त्री० त्रिका० स्त्रियां ङीष् ।

**शितिचार** पु० शितिः सन् चरति चर–संज्ञायां कर्त्तरि घञ् । (सुषनि) शाकभेदे जटा० ।

**शितिच्छद** पु० शितिः शुभ्रः छदो यस्य । हंसे शब्दर० ।

**शितिसारक** पु० शितिः शुभ्रः सारो यस्य कप् । तिन्दुकवृक्षे राजनि० ।

**शिथिल** त्रि० श्रथ–किलच् पृषो० । १श्लथे २अदृढे संयोगभेदे ३मन्दे च "शिथिलसंयोगस्य प्रचयः । "प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते" भाषा० "भूयोऽवयवावच्छेदेनावयवान्तरसंयोगिन्यवयवे वर्त्तमानः संयोगः प्रचयः" इति दीनकरी यथा तूलकादौ ।

**शिनि** पु० शि–निक् । यदुवंश्ये क्षत्रियभेदे यस्य सात्यकिर्नप्ता

**शिपि** पु० शी–क्विप् तां पाति पा–कि पृषो०ह्रस्वः । १रश्मौ २जले न० "शैत्यात् शयनयोगाच्च शिपि वारि प्रचक्षते । तत्पानाद्रक्षणाच्चैव शिपयो रश्मयो मताः । तेषु प्रवेशात् विश्वेशः शिपिविष्ट इहोच्यते" व्यासः ।

**शिपिविष्ट** पु० ७त० । १खलतौ २दुश्चर्मणि च ३महेश्वरे अमरः । ४विष्णौ शिपिशब्दे दृश्यम् । "नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः" विष्णुस० । पृषो० शिपविष्ट तत्रार्थे रमानाथः ।

**शिप्र** पु० शि–रक् पुक् च । १सरोवरभेदे २नदीभेदे स्त्री । "एवं विवाह्य विधिवत् सौवर्णं मानसाचले । अरुन्धतीं वशिष्ठस्तु मोदमाप तथा बहु । तत्र यत् पतितं तोयं मानसाचलकन्दरे । विवाहावभृतार्थाय शान्त्यर्थं वसुधातले । ब्रह्मविष्णुमहादेवपाणिभिः समुदीरितम् । तत्तोयं सप्तधा भूत्वा पतितं मानसाचलात् । हिमाद्रेः कन्दरे सानौ सरस्याञ्च पृथक् पृथक् । तत्तोयं पतितं शिप्रे देवभोग्ये सरोवरे । तेन शिप्रा नदी जाता विष्णुना प्रेरिता क्षितिम्" कालिका० २३अ० । "ततो हिमवतः प्रस्थे प्रतीच्यां तत्पुरस्य च । शिप्रं नाम सरः पूर्णं दृष्टपुष्टं हिमाद्रयः । तद्रूहः स्यानमासाद्य ब्रह्मशक्रादयः सुराः । उपविष्टा यथान्यायं